

# ब्रह्मानन्दवल्ली



(तैत्तिरीय उपनिषत् द्वितीय प्रश्नः)

ॐ सहनाववतु । सहनौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः
शान्तिः शान्तिः ॥

ॐ ब्रह्मविदाप्नोति परम् । तदेषाऽभ्युक्ता । सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् ।
सोऽश्नुते सर्वान् कामान्सह । ब्रह्मणा विपश्चितेति । तस्माद्वा एतस्मादात्मन आकाशस्संभूतः । आकाशाद्वायुः ।
वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात्पुरुषः । स वा एष
पुरुषोऽन्नरसमयः । तस्येद–मेव शिरः । अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः । अयमात्मा । इदं पुच्छं प्रतिष्ठा
। तदप्येष श्लोको भवति ॥ १ ॥

अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्च पृथिवीग्श्रिताः । अथो अन्नेनैव जीवन्ति । अथैन–दपियन्त्यन्ततः ।
अन्नग्ं हि भूतानां ज्येष्ठम् । तस्मात् सर्वौषधमुच्यते । सर्वं वै तेऽन्नमाप्नुवन्ति । येऽन्नं ब्रह्मोपासते । अन्नग्ं हि
भूतानां ज्येष्ठम् । तस्मात् सर्वौषधमुच्यते । अन्नाद्भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते । अद्यतेऽत्ति च भूतानि
। तस्मादन्नं तदुच्यत इति । तस्माद्वा एतस्माद्–अन्न–रसमयात् । अन्योऽन्तर आत्मा प्राणमयः । तेनैष पूर्णः ।
स वा एष पुरुषविध एव । तस्य पुरुष विधताम् । अन्वयं पुरुषविधः । तस्य प्राण एव शिरः । व्यानो दक्षिणः
पक्षः । अपान उत्तरः पक्षः । आकाश आत्मा । पृथिवी पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ २ ॥

प्राणं देवा अनु प्राणन्ति । मनुष्याः पशवश्च ये । प्राणो हि भूतानामायुः । तस्मात् सर्वायुषमुच्यते । सर्वमेव त
आयुर्यन्ति । ये प्राणं ब्रह्मोपासते । प्राणो हि भूतानामायुः । तस्मात् सर्वायुषमुच्यत इति । तस्यैष एव शारीर
आत्मा । यः पूर्वस्य । तस्माद्वा एतस्मात् प्राणमयात् । अन्योऽन्तर आत्मा मनोमयः । तेनैष पूर्णः । स वा एष
पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य यजुरेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः
पक्षः । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ ३ ॥



# ब्रह्मानन्दवल्ली



(तैत्तिरीय उपनिषत् द्वितीयप्रश्नः)

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कदाचनेति । तस्यैष एव
शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्मान्मनोमयात् । अन्योऽन्तर आत्मा विज्ञानमयः । तेनैष पूर्णः । स
वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य श्रद्धैव शिरः । ऋतं दक्षिणः पक्षः ।
सत्यमुत्तरः पक्षः । योग आत्मा । महः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ ४ ॥

विज्ञानं यज्ञं तनुते । कर्माणि तनुतेऽपि च । विज्ञानं देवास्सर्वे । ब्रह्म ज्येष्ठमुपासते । विज्ञानं ब्रह्म चेद्वेद ।
तस्माच्चेन्न प्रमाद्यति । शरीरे पाप्मनो हित्वा । सर्वान् कामान् समश्नुत इति । तस्यैष एव शारीर आत्मा । यः
पूर्वस्य । तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्माऽनन्दमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव ।
तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः ।
आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ ५ ॥

असन्नेव स भवति । असद् ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद । सन्तमेनं ततो विदुरिति । तस्यैष एव
शारीर आत्मा । यः पूर्वस्य । अथातोऽनु प्रश्नाः । उता विद्वानमुं लोकं प्रेत्य । कश्चन गच्छती (३) । आहो
विद्वा–नमुं लोकं प्रेत्य । कश्चित् समश्नुता (३) उ । सोऽकामयत । बहुस्यां प्रजायेयेति । स तपोऽतप्यत । स
तपस्तप्त्वा । इदग्ं सर्व–मसृजत । यदिदं किञ्च । तत्सृष्ट्वा । तदेवानु–प्राविशत् । तदनु प्रविश्य । सच्च
त्यच्चाभवत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च । विज्ञानं चाविज्ञानं च । सत्यं चानृतं च
सत्यमभवत् । यदिदं किञ्च । तत्सत्यमित्या–चक्षते । तदप्येष श्लोको भवति ॥ ६ ॥

असद्वा इदमग्र आसीत् । ततो वै सदजायत । तदात्मानगग् स्वयमकुरुत । तस्मात् तत् सुकृतमुच्यत इति । यद्वै
तत्सुकृतम् । रसो वै सः । रसगग् ह्येवायं लब्ध्वाऽऽनन्दी भवति । को ह्येवान्यात् कः प्राण्यात् । यदेष आकाश
आनन्दो न स्यात् । एष ह्येवाऽऽनन्दयाति । यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां



# ब्रह्मानन्दवल्ली

(तैत्तिरीय उपनिषत् द्वितीयप्रश्नः)



विन्दते । अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदर मन्तरं कुरुते । अथ तस्य भयं भवति । तत्त्वेव भयं विदुषोऽमन्वानस्य । तदप्येष श्लोको भवति ॥ ७ ॥

भीषाऽस्माद् वातः पवते । भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चम इति । सैषाऽऽनन्दस्य मीमाग्ंसा भवति । युवा स्यात्-साधुयुवाऽध्यायकः । आशिष्ठो दृढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः । स एको मनुष्यगन्धर्वाणा-मानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं मनुष्यगन्धर्वाणा-मानन्दाः । स एको देवगन्धर्वाणा-मानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगन्धर्वाणा-मानन्दाः । स एकः पितृणां चिरलोक-लोकानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं पितृणां चिर लोक लोकाना-मानन्दाः । स एक आजानजानां देवाना-मानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं आजानजानां देवाना-मानन्दाः । स एकः कर्मदेवानां देवाना-मानन्दः । ये कर्मणा देवानपि-यन्ति । श्रोत्रियस्य चाकामहतस्य । ते ये शतं कर्मदेवानां देवाना-मानन्दाः । स एको देवाना-मानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवाना-मानन्दाः । स एक इन्द्रस्याऽऽनन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतमिन्द्रस्याऽऽनन्दाः । स एको बृहस्पतेरानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं बृहस्पतेरानन्दाः । स एकः प्रजापतेरानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं प्रजापतेरानन्दाः । स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्य । स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । स य एवंवित् । अस्माल्लोकात् प्रेत्य । एतमन्नमयम्-आत्मानम्-उपसंक्रामति । एतं प्राणमयम्-आत्मानम्-उपसंक्रामति । एतं मनोमयम्-आत्मानम्-उपसंक्रामति । एतं विज्ञानमयम्-आत्मानम्-उपसंक्रामति । एतम्-आनन्दमयम्-आत्मानम्-उपसंक्रामति । तदप्येष श्लोको भवति ॥ ८ ॥



# ब्रह्मानन्दवल्ली

(तैत्तिरीय उपनिषत् द्वितीयप्रश्नः)



यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कुतश्चनेति । एतग्ं ह वा व न तपति । किमहग्ं साधु नाकरवम् । किमहं पाप–मकरवमिति । स य एवं विद्वानेते आत्मानग्ं स्पृणुते । उभे ह्येवैष एते आत्मानग्ं स्पृणुते । य एवं वेद । इत्युपनिषत् ॥ ९ ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि ना–वधीत–मस्तु मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ॥